International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 124-127
© 2018 IJSR
www.anantaajournal.com
Received: 25-07-2018
Accepted: 26-08-2018

**Dr. Ashok Kumar Varma K**
M.Phil Advaita Vedanta, (Sanskrit) RSVP-Tirupati, Chief Medical Officer, Sri. H.k.V.P.B. Trust Hospital Sri Kali Gardens, Namburu, Guntur District, Andhra Pradesh, India

**Correspondence**
**Dr. Ashok Kumar Varma K**
M.Phil Advaita Vedanta, (Sanskrit) RSVP-Tirupati, Chief Medical Officer, Sri. H.k.V.P.B. Trust Hospital Sri Kali Gardens, Namburu, Guntur District, Andhra Pradesh, India

# संस्कृतवाङ्गमये पर्यावरण परिरक्षणम्

**Dr. Ashok Kumar Varma K**

अस्मिन् शीर्षके पदत्रयमस्ति संस्कृतवाङ्गमयम्,पर्यावरणं,परिरक्षणम् इति। तत्र वाङ्गमय शब्देन किं प्रतिपाद्यते इति विचारयामः। छान्दोग्योपनिषदि सप्तमाध्याये नारदसनत्कुमारसंवादः प्रस्तुतो वर्तते। नारदः आत्मज्ञानेन दुःखनिवृत्तिर्भवति इति "तरति शोकमात्मवित्" इति ज्ञात्वा सनत्कुमारमात्मज्ञानिनं प्रार्थयति आत्मज्ञानं बोधयितुम्। तदा सनत्कुमारः नारदं भवता यद्ज्ञातमस्ति तत् कथय इति आदिशति। तस्य नारदस्य समाधानं वयं परिशीलयामश्चेत् संस्कृतवाङ्गमयशब्दार्थः अवगतस्स्यात्। नारदः स्वज्ञानम् एवं अविष्करोति। "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि"। एतेन अस्माकं शीर्षकगतसंस्कृतवाङ्गमयशब्दार्थः ज्ञातः।

अधुना पर्यावरणशब्दं विचारयामः। व्रियते वेष्ट्यते अनेनेति वरणः। परि परितः, आसमन्तात् वरणः पर्यावरणः। पूर्णतया अर्थात् अन्तर्बहिश्च व्याप्य येन वेष्टितो भवति सः पर्यावरणशब्दार्थः।

केन वेष्टितः (आवृतः Surrounded) इति परिशीलने अस्माकं पुरतः प्रत्यक्षतः परिदृश्यमानः अयं प्रपञ्चः अस्मान् आवृत्यतिष्ठति इति प्रतिभाति। अस्मान् आवृत्य विद्यमानः प्रपञ्चः कीदृशः इति पुनर्विचारणे पञ्चभूतात्मकः इति ज्ञायते। एवं प्रकारेण विचारणे कृते अस्माकं पुरतः त्रीणि आवरणानि मुख्यतया गोचराणि भवन्ति आध्यात्मिक-आधिभौतिक-आधिदैविकभेदेन।

## आध्यात्मिक पर्यावरणम्

आवरणविषये अवश्यं एतन्मनसिकरणीयं यत् यः आवरणेन आवृतः सः आवरणात् भिन्नः।

उदाहरणारथं अह वस्त्रेण आवृतः अतः पूर्वोक्तनियमानुसारेण अहं वस्त्रात् भिन्नः।
पर्यावरणं तु मम प्रकृतोदाहरणानुसारेण वस्त्रम्। तद् वस्त्रं यदि अशुद्धं तर्हि चर्मरोगकारणं भवति। एतद् वैयक्तिकं पर्यावरणं यदि कलुषितं सत् व्यक्तेः अनर्थकारणं भवति चेत् किं वक्तव्यं यदि सङ्घपर्यावरणं पञ्चभूतात्मकं कलुषितं भवति चेत् कियान् अनर्थः स्यात्।

**आधिभौतिक पर्यावरणम्**

मया पुर्वं आध्यात्मिकादिभेदेन आवरणत्रयमुक्तम्। तत्र आधिभौतिकपर्यावरणं भवति पञ्चभूतात्मकः। अर्थात् पृथिव्यप्तेजोवायुवाकाशत्मकः। आधिदैविकपर्यावरणं भवति हिन्दु मुस्लिम् क्रीस्तु बौद्ध जैनाद्यात्मकः। आध्यात्मिक पर्यावरणं भवति वस्त्रमारभ्य हृदयपर्यन्तः अर्थात् वस्त्रं चर्म अस्थि रक्त मज्ज्यात्मकः। एवं पर्यावरण शब्दार्थः विचारितः।
अधुना परिरक्षणशबदार्थः विचार्यते। एतेषां आधिभौतिकादि भिन्नानां पर्यावरणानां संरक्षणं तु तत् तत् पर्यावरणगततत्त्वानां अकलुषीकरणेन सिध्यति।

**आधिदैविक पर्यावरणम्**

आधिदैविक पर्यावरणपरिरक्षणं तु मतसामरस्येन समभावनया च भवति।
आध्यात्मिकपर्यावरणपरिरक्षणं द्विविधं लौकिकं पारमार्थिकं च। लौकिकं तु शरीरसम्बन्धि। तस्य परिरक्षं तुशुद्धाहार-पानीय-वस्त्रधारणादिभिः भवति। पारमार्थिकपर्यावरणरक्षणं तु योगाभ्यास, वेदान्त श्रवण, सत्सङ्गादिभिः सिध्यति इति यथा मति संस्कृतवाङ्गमये पर्यावरणपरिरक्षणम् इति शीर्षकार्थो निरूपितः।
भगवत्गीतायां योगपरिरक्षणोपायः भगवता षष्ठाध्याये अर्जुनं प्रति उपदिष्टः

> युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
> युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।
> (भ.गी.६.१७) इति।।

अस्य श्लोकस्य भाष्यं भगवत्पादैः एवं लिखितम् "युक्त इति।। युक्ताहारविहारस्य आह्रियते इति आहारः अन्नं, विहरणं विहारः पादक्रमः, तौ युक्तौ नियतपरिमाणौ यस्य सः युक्तहारविहारः तस्य, तथा युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य कर्मसु तस्य ; तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्च अवबोधश्च तौ नियतकालौ यस्य तस्य ; युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा सर्वसांरदुःखक्षयकृत् योगः भवति इत्यर्थः।।

आत्र युक्ताहारत्वं नाम---

> पूरयेत् अशनेनार्धं तृतीयमुदकेन तु।
> वायोः सञ्चरनार्थं तु चतुर्थमवशेषयेत्।।

इत्यादि योगशास्त्रोक्त नियमेन (पद्धत्या) क्षुन्निवारणं। युक्तविहारत्वं नाम "योजनान्नपरं गच्छेत्" इत्यादिनियमानुसारेण गमनादि चेष्टाकरणं।।

युक्तस्वप्नावबोधत्वं नाम---

> "रात्रेर्भागत्रयंकृत्वा प्रबद्धः प्रथमान्तयोः।
> प्रस्वपन् मध्यमेभागे योगयोग्यः प्रजायते" ।।

इत्यादि स्मृत्युक्त्यनुसरेण निद्राद्याचरणम्।

एतेषां युक्ताहारादि नियमानां परिपालनेन योगसिद्धिः भवति। योगश्च परिरक्षितोभवतीति च जगद्गुरुः श्रीकृष्णः प्रतिपादयति। एतद् व्यतिरेकेण वर्तमानः योगंपरिरक्षितुं (योगसिद्धि प्राप्तुं) नैव शक्नोति इत्यपि प्रतिपादयति। "नात्यश्नतस्तु" इत्यादिना---

> नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
> न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन।।
> (भ.गी. ६.१६) इति।।

एतेन ज्ञायते यत् सर्वत्रपि व्यवहरे युक्तता अपरिहार्या इति अर्थात् “अतिसर्वत्रवर्जयेत्” इति नियमः अथवा लोकोक्तिः सिध्यति।।

अधुना एतेन गीतोपदेशेन कथं पर्यावरण रक्षणं कर्तुं शक्यते इति परिशीलयामः। वयं जानीमः प्रपञ्चे सर्वत्र सर्वेषु रङ्गेषु पुरोगतिः अत्यन्तवेगेन प्रचलति इति। एतस्यै पुरोगत्यै कृते बहूनि निर्माण कार्याणि नूतननिरर्माणार्थं वननद्यादि आक्रमणानि, आक्रमणार्थं वृक्षादि कर्तनं, जलशयादिपूरणं किमुक्तव्यं पर्वतादीनामपि ध्वंसः, अपेक्षितापक्षया अधिकांशेन क्रियते। तेन पर्यावरणस्य, रक्षणं न, भक्षणमेव साध्यते। वस्तुतः पर्वतनद्यारण्यादीनि पर्यावरणरक्षनार्थं भगवदत्तानीति शास्त्रविदां (वैज्ञानिकानां) आशयः। तत्र यदि गीतोक्त पद्धतिं (यक्ताहारविहारेत्यादि) अनवलब्य यथेष्टं नियममुल्लंघ्य वृक्षादिकर्तनं, अत्यधिकतया कलुषितधूमजलादिविसर्जनं, पर्वतनद्यादि आक्रमणं तत्स्थाने बहुभूमिकाभवनादि (Multistoried) निर्माणं क्रियतेचेत् कथं पर्यावरणं रक्षितं स्यात्। अतः योग सिद्ध्यर्थं गीतायां उक्तानां नियमाणां पर्यावरणरक्षनार्थमपि परिशील्य प्रयोगः हितायस्यादिति मम आशयः।

संस्कृतं नाम संस्कार पूरितं (सम्यक् कृतम्) इत्यर्थः। सम्यक्करणं च कस्यचित् वस्तुनः (पदार्थस्य) वा संस्कारेण त्रिविधेन भवति। शास्त्रेषु त्रिविधः संस्कारः दृशयते। १) दोषमार्जनं, २) अतिशयाधानं, ३) हीनानां अवयवानां पूरणं (हीनाङ्गपूर्तिः) इति।

**दोषमार्जनम्**

लोके विविधाः पदार्थाः दृश्यन्ते प्राकृताः (Natural) संस्कृताश्चेत्। ये प्राकृत्या उत्पादिताः तस्मिन्नेवरूपे स्थिताः पर्वत-नदी-महीरुहादयः। ये तु मनुष्यैः संस्कृत्य स्वोपयोगाय कल्पिताः ते भवन्ति संस्कृताः। प्राकृताः पदार्थाः स्वस्वरूपे स्थिताः संस्कारान् अनवाप्य प्रायेण मनुष्योपयोगिनो नैव भवन्ति, अल्पमेव वा उपयोगं साधयन्ति। तस्मात् मनुष्याः तान् (प्राकृतपदार्थान्) संस्कृत्य स्वयं उपभुञ्जते यथा---अन्नं वस्त्रं वा यथा प्रकृतिरुत्पादयति, न तथा असमद्युपयोगी न भवति। प्रकृत्या उत्पादितं शालि गोधूमादिकं स्वोपयोगाय वयं संस्कुर्महे।

तत्र प्रथमं तत्सहचरं अस्मत् अनुपयोगि तृण, तुषादिकं अपनयामः धूळ्यादिकं च दूरीकुर्मः। तद् एतद् दोषमार्जनं।

**अतिशयाधानम्**

अथ स्वच्छीकृतं (दोषरहितं) पेषण्या निष्पिष्टं वह्निना परिपक्वं कुर्मः। तदेतत् अतिशयाधानम्। रुचयुतपादनय लवणशाखादिभिश्च संयोजयामः। एषैव हीनाङ्गपूर्तिः उच्यते।

**हीनाङ्गपूर्तिः**

तथैव यथाविधं वस्त्रं वयं परिदध्मः। तथा प्रकृत्या नोत्पादितमिति जानन्ति सर्वेऽपि। प्रकृत्या कार्पासः उत्पादितः, दोषमार्जनेन संस्कारेण तदन्तस्थानि बीजानि विशोध्य धूळिकाणां च दूरीकृत्य अतिशयाधानात्मकेन च संस्कारेण सथूलं तंतुरूपतां वयनेन वसन रूपतां, सीवनेन परिधानीयरूपतां च प्रापय्य हीनाङ्गपूर्तये पिधायक वर्तनादिभिः तैः (Buttons, etc) संयोज्य उपयोगः मनुष्यसमाजेन क्रियते। एवमेव लोह, पित्तळ, सुवर्णादिषु धातुषु, गृहनिर्माणादिष्वपि च संस्कारत्रयं अनुसंधेयं। दैनदिनवस्तुषु संस्कारानैतान् सर्वेऽपि मानवाः परिचिन्वन्ति। तत्र कौशल उपदर्शयन्तश्च महद् यशोधनराशिं च आर्जयन्ति।

एतावत् पर्यन्तं जडविषयकः संस्कारप्रक्रियाप्रकारः विचारितः। परं चेतनानां मानवानां एते संस्काराः भवन्ति। तेऽपि च एतैः संसकारैः संस्कृताः कमपि उत्कर्षं जगदुपयोगिताञ्च (समाजयोगिताञ्च) आवहन्ति इति विशिष्य भारतीयैर्महर्षिभिः विज्ञातम्। तैरेव महर्षिभिः मनुष्याणां त्रिविधाः संस्काराः आविष्कृताः।

एतेन ज्ञायते यत् संस्कृतं नाम संस्कारपूर्णं (सहितम्) इत्यर्थः। एतत् दृष्ट्या यदि वयं प्रपञ्चगतानि वस्तूनि संस्कुर्मः पर्यावरण रक्षणं किमु न भवेत् ? अवश्यं परिरक्षमेव भवेत्।

अत्रैते मन्त्राः कृष्णयजुर्वेदारण्यकान्तर्गताः प्रकृतिः (पर्यावरणं) कथं द्रष्टव्या इति बोधयन्ति। तथाहि---

शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः। अहानि शं भवन्तु नश्शङ् रात्रिः प्रतिधीयताम् शमुषा नोव्युच्छतु शमादित्य उदेतु नः। शिवा नश्शन्तमा भव सुमृडीका सरस्वति।

पृथिवी शन्ता साऽग्निन शान्ता सा मे शानता शुचगँ शमयतु। अन्तरिक्षगँशान्तं तद्वायुना शान्तं तन्मे शान्तगँ शुचगँ शमयतु। द्यौश्शान्ता साऽऽदित्येन शान्ता सा मे शान्ता शुचगँ शमयतु पृथिवी शान्ति रन्तरिक्षगँ शान्ति द्यौश्शान्तिर्दिशश्शान्तिरवान्तरदिशाश्शानतिरग्निश्शान्तिः वायुशशान्तिरादित्यश्शान्तिः चन्द्रमाशशान्तिर्नक्षत्राणि शान्तिरापश्शान्ति रोषधयश्शानतिर्वनस्पतयश्शान्तिः गौश्शान्तिरजा शान्तिरश्वश्शान्तिः पुरुषश्शान्तिर्ब्रह्म शान्तिर्ब्राह्मणश्शानतिश्शान्तिरेव शान्तिश्शानतिर्मे अस्तु शान्तिः। तयाऽहगँ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुषिपद् च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः।। इति शम्।।